विघ्नाधिराजशतकम्

विठलदेवुनि सुन्दरशर्मा

विघ्नाधिराजशतकम्

FOR FAVOUR OF REVIEW

विठलदेवुनि सुन्दरशर्मा
परिशोधन सहायकः
संस्कृतपरिषत्,
उस्मानियाविश्वविद्यालयः,
हैदराबाद्–500 007.
(आन्ध्र प्रदेशः)

विघ्नाधिराजशतकम्
प्रथमावृत्तिः – 1984
प्रतयः 1000

सर्वेऽधिकाराः स्वायत्ताः

मूल्यम् – रू. 10–00

तिरुमलतिरुपतिदेवस्थाना-
धिकारिभिर्वितीर्णार्थिकसा-
हाय्येन मुद्रापितोऽयं ग्रन्थः

प्राप्तिस्थानम्-
श्रीमती विठलदेवुनि नागरत्नम्मा
1-9-1112/G/3, दयानन्दनगरम्,
हैदराबाद्-500 044 (आन्ध्रप्रदेशः)

हैदराबाद्नगरस्थ
जितेन्द्र प्रिंटिंग्वर्क्स
मुद्रणालये मुद्रितम्

Vighnadhiraja Satakam

V. SUNDARA SARMA
Research Assistant,
Sanskrit Academy,
Osmania University,
Hyderabad-500 007 (A. P.)

VIGHNADHIRAJA SATAKAM

FirstEdition - 1984

Copies - 1000

All rights reserved

Price Rs. 10·00

This book has been published with the financial assistance granted by Tirumala Tirupati Devasthanams Tirupati.

for copies :-

Srimathi V. NAGARATNAMMA,

1-9-1112/G/3, Dayanandanagar

(Vidyanagar), Hyderabad-500 044 (A.P.)

printed at

Jitendra Printing Works

Kutbiguda, Hyderabad.

समर्पणम्

2. विघ्नेश ! लोकहित ! देव ! सहस्रकोटि-
भानुप्रकाश ! पुरुहूतमुखामरेड्य ! ।
ज्ञानात्मकेशतनयागसमानधैर्य !
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

10. नाहं कविर्न खलु शब्दविकासवेत्ता
वेदान्तशास्त्रसुविचारमहं न जाने ।
आलम्बनं त्वमिह देव ! मम प्रयत्ने
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

11. नाम्नैव 'सुन्दर' इति प्रथितोऽस्मि देव !
सौन्दर्यमस्ति न हि किञ्चिदपीह वाचि ।
कः प्रौढिमा तव गुणस्तवने हि मेऽस्ति
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

12. स्तोतुं शिवात्मज ! गुणांस्तव नित्यसत्त्वान्
शेषोऽपि नालमथ कोऽहमहो गणेश ! ।
अङ्गीकुरुष्व मम वाचमिवार्भकस्य
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

108. कायेन चाथ वचसा मनसेन्द्रियैर्वा
बुद्ध्यात्मना च सततं क्रियते मया यत् ।
सर्वं हि तुभ्यमहमद्य समर्पयामि
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

विठलदेवुनि सुन्दरशर्मा



विठलदेवुनि सुन्दरशर्मा

वक्तव्यं किञ्चित्

अव्याजकरुणाकटाक्षवीक्षणानुगृहीतसर्वलोकस्य भगवतः श्रीनिवासस्य निरतिशयानुग्रहबलात्, सहजवात्सल्यैकमण्डनानामस्मदाचार्यवर्याणां परिपूर्णाशीर्बलात्, भर्त्रा साकं पुण्यलोकवासिन्या मज्जनन्याः विठलदेवुनि गौरम्माभिधानायाः श्रीमत्याः गौरीदेव्याः निरन्तरवात्सल्याशीर्विशेषाच्च गतेषु 1978, 1980, 1981, 1982, 1983 वत्सरेषु मद्रचितं श्रीनिवासशतकादिशतकपञ्चकं मुद्रितं प्रकाशितं चाभूत्। तच्च शतकपञ्चकमान्ध्रशतकरचनाप्रक्रियामनुसृत्य समकुटं निरमायि ।

यच्च सम्बुद्धयन्तमकुटनिर्मितिरितः पूर्वतने 'वीराञ्जनेयशतकादिशतकत्रये समादृताऽभूत् सैवात्रापि 'विघ्नाधिराजशतके'ऽपि समादृताऽस्ति ।

तदेतस्य 'विघ्नाधिराजशतक'स्य प्रकाशनार्थं द्रव्यसाहाय्यमुद्घोषितवद्भ्यः श्रीपत्तिरुमलतिरुपतिदेवस्थानाधिकारिभ्यः समर्प्यन्ते हार्दा नमोवाकाः । गीर्वाण्यां 'प्रस्तावना'रचयितृभ्यः डा. ए. एन्. वर्खेड्कर्महोदयेभ्यः, तथा आङ्गलभाषामयोपोद्घातनिर्मात्रीभ्यः श्रीमतीभ्यः डा. नलिनीसधलेमहाभागाभ्यश्च कृतज्ञतापूर्वकप्रणामाञ्जलिरर्प्यते । ग्रन्थमिमं सुन्दरं मुद्रितवन्तो 'जितेन्द्रप्रिंटिग्वर्क्स्'संस्थीया धन्यवादार्हाः ।

हैदराबाद्

11-3-1984

विठलदेवुनि सुन्दरशर्मा

Dr. Mrs. NALINI SADHALE, M.A., Ph.D.,
Reader
Dept. of Sanskrit,
Osmania University,
Hyderabad-500 007

INTRODUCTION

Although critics have since long recognized the literary value of the Sanskrit devotional poetry, a large mass of this kind of literature is still not studied with the attention and care that it deserves.

Such religious poetry is as old as the Sanskrit literature itself. The Vedas themselves contain several Suktas which rise to great literary heights. Their lyrical purity and freshness of genuine religious feeling are scarcely achieved by the later devotional poems.

Ramayana contains two stotras in the Yuddhakanda. One is the famous 'Aditya-hrdaya' revealed by sage Agastya to Ramâ, just before his final encounter with Ravana. Aditya, when propitiated by this stotra by Rama, is believed to have contributed a great deal to Rama's victory over Ravana. Another Stotra is that of Rama himself sung by gods when the former

refused to accept back his wife after his victory over Ravana.

Mahabharata also contains many such Stotras. Visnu Sahasranama revealed by Bhishma to Yudhishthira, being one of the most wellknown of them.

The Mahakavyas and Natakas too, particularly the Nandis of some of the Natakas, occasionally rise to the status of Stotras by their superb devotional qualities.

However, besides these, a tremendous mass of independent Stotras were also composed since very early period. They vary greatly in size as well as in literary quality. Granted that a huge proportion of them fails to rise to the level of genuine poetry and is mostly litergical in character, their contribution to Sanskrit literature can never be overestimated. Many of them string together several ephithets of the particular deity on the lines of Vishnu-Sahasranama. Some preserve memories of the legendary exploits of these deities and are almost like hero-ballads. Quite a few remain content by describing the idol in the minutest details. These and such other stotras have very little room for a lofty religious sentiment. But when Alankaras, Poetic fancy, language gimmics and such other means of sucular poetry are pressed into service of

these stotras they often coatain Chamatkruti if not poetry.

There are some subtler features of literary art which when applied to the compositiou of the religious poetry have rendered good results.

Expression of the religious sentiment through a sublimated erotic sentiment is one such feature. Great poets like Jayadeva have used this technique for their compositions, so successfully that their works like Geeta-Govinda have formed a class of their own in Sanskrit literature.

Religious sentiment is often seen transferred into Vatsala Rasa, when the deity is dcscribed as a child. Maximum number of such stotras are addressed to Lord Krishna. These stotras, too, have opened a whole new avenue not only for literary art but also for music and paintings.

When the religious sentiment springs from the devotee's mind through a longing to severe all connections with the material world, in order to be one with his favourite deity, often the stotra touches 'Bibhatsa Rasa' as the poet describes the material existence with all its temptations and deceptions in order to finally condemn it.

In many Stotras, however keen though the poet devotee is to unite with God, the feeling of renunciation expressed therein remains on a calmer note and tempo and the Rasa thus evoked in the stotra is Shanta rather then the 'Bibhatsa', Expressions like,

'पुनरपि जननं पुनरपि मरणं पुनरपि जननी जठरे शयनम्'

found in the stotras of Shankaracharya can often rise to the highest level of shanta. The same tempo when further enriched expresses lofty philosophical concepts within the range of poetry. The sheer transitoriness of the earthly existence is thus beautifully described by Shankaracharya in–

'कस्त्वं कोऽहं कुत आयात: का मे जननी को मे तत:',

The variety of moods and richness of contents which provide religious poetry with the poetic tissue should become clear from the foregoing passages. Even when it does not rise to great literary heights it contains sevetal important literary features.

Composing a hymn in praise of a deity is not new for Sri V. Sundara Sarma either. He already has to his credit five similar poems, शम्भु, छायापति, वीराञ्जनेय, श्रीनिवास, देवी – being the other deities glorified through them.

The trained hand of the poet proceeds with confidence and ease with the present विघ्नराजशतक, too. Like his previous poems here also his choice falls on the musical Vasantatilaka metre. Adding to the melody of the metre comes the Mukuta, विघ्नाधिराज! विनमज्जनवत्सल भूज ! coming at the end of each verse. (One is tempted to suggest here, however, that the poet should have avoided the use of the not so melodious sound of the penultimate 'भू'. In the oral recitation of the Vasantatilaka verse this letter is bound to be accented and is likely to come in the way of the otherwise easy and smooth flow. Most probably the poet could not overcome the temptation of the alliteration available by using the word 'भूज'.)

In thetrue traditional style the poet begins with गुरुस्तुति and पितृस्मृति followed in the actual text of the poem, by many apologies for his inability to compose a good poem. He prays God, Vighnaraja to remain content with his 'unpolished, immature words'. The intention of composition is made clear in the beginning itself stating "I am not aspiring for a poet's fame. If you cast a compassionate glance at me. I will be fully rewarded for this little effort". One would consider the poet to be well within his limits if he had proceeded with his poem after devoting one or two verses to this kind of apology.

However the subject seems to recur throghout the poem. Even after progressing through more than half of the poem one is surprised to see the poet still apologising for his 'dule wit' and 'lack of learning' (V. 60, 64). In verses 102 and 103, even at the cost of repetition of the content the poet returns to the same subject. Considering the poet's fairly good command on the difficult classical language, such profuse apologies certainly look anwarranted.

'मूर्तिवर्णन' which while facilitating meditation of the deity for the devotees, also provides devotional hymns with the .element of variety comparatively received less attention of the poet.

Verses like अर्धेन्दुशेखर ! महाबल ! भूतनाथ !
नागोपवीत ! गिरिराजसुतातनूज !
वक्रास्य ! देव ! विमलेन्दुमरीचिगात्र !

show the poet's ability for such descriptions. Particularly in the case of Ganapati the poet's descriptive skill had plenty of scope.

There are two instances, however, where the poet is marvellous in such descriptions–Thus about the शुण्डादण्ड - he prays Lord Ganesh.–

स्वान्तालय सकलकल्मषमादिवन्द्य !
शुण्डालदण्डविसरेण गणाधिनाथ !
सम्मार्जयाशु कृपया करुणासमुद्र !

and about the huge ears of the गजमुख the poet says,

श्रोतुं च नाहमथ यद्भवतीह लोके
पापिष्ठजन्तुचरितं तदहो महात्मन् !
मन्येऽपवारयसि कर्णविचालनेन

The मूर्तिवर्णन reaches a good poetic level through the use of उत्प्रेक्षा on the constant 'shaking of the ears' and through the suggested humbleness of the devotee. The main-stay of such शतकs composed in praise of a single deity however, is bound to be the adjectivel vocatives. Shri Sarma also quite heavily leans of the same device. Thus in places like

मत्तेभवक्त्र ! मदनारिकुमार ! वीर !
स्कन्दाग्रजात ! कमलाप्तसमानतेजः ! ।
हेरम्ब ! भूतगणनाथ ! कृपासमुद्र !

we come across entire verses consisting only of such descriptive epithets.

The main reason for the monotony and stereotype in the devotional hymns is the henotheistic spirit

of the Hindu relegion. As a result of this spirit every God that is praised by the poet is stated to be the highest and the most supreme. Shri Sarma in his श्रीनिवासशतक says–

त्व मेकमेव शरणं खलु मन्यमानो
नान्यं स्मरामि जगदेकशरण्यमूर्ते । (V. 12)

In देवीशतक he says–

एका त्वमम्ब यदि तृप्तिमथैषि चान्यैः
किं कार्यमस्ति, यदि नैषि तथापि किं वा ? ।
त्वामन्तरा त्रिजगतां शरणं किमस्ति ? (V. 78)

In शम्भुशतक he proclaims–

कल्याणदायि निरतप्रकटप्रसाद-
मिष्टार्थदानचतुरं भुवनैकपूज्यम् ।
अन्यत्र मेऽस्ति शरणं चरणं विना ते–(V. 6)

In वीराञ्जनेयशतक he repeats,

अन्यत्र मेऽस्ति शरणं चरणं विना ते (V. 2)

In छायापतिशतक he declares,

भक्तेष्टपूरणविधिप्रकटप्रभावा

बहिर्मुखा बहुविधा ननु सन्तु नाम ।
प्रत्यक्षदैवमिति देव ! भवान् प्रसिद्धः (V. 10)

Much similar in content is here in विघ्नराजशतक the verse—

बहिर्मुखा बहुविधा ननु सन्तु नाम
किं तैस्तपोभिरनिशं खलु यान्ति तोषम् ।
तोषं त्वमेषि किल संस्मरणेन देव !

Such repetition in throught in each stotra, however sincere, is bound to deprive the stotras of the element of variety. But the poet has sufficiently compensated for it by refferring to Ganesha's individual characteristics. Thus Ganesha is particularly praised for removing obstacles, at the commencement of any important undertaking (V. 3, 8. 54, 53, 56, 64,). He is believed to be a giver of knowledge (V. 14, 22, 23, 24. 25, 26, 30, 31, 33, 49, 60, 61).

Besides these verses the latter part of the Stotra almost becomes a hero-ballad, as from V. 67 onwards the poet glorifies the deity by relating the wellknown story of Ganesha's birth. The elephanthead of the deity has throughout been a problem with all the Puranakaras. Each one has tried to explain it in a different way. Shri Sarma relates the story on the lines of Shivapurana.

Shiva and Ganapati are two separate deities today, but at some time in the past there was a tradition to regard them as one. A trace of this is seen in many Ganapati Stotras. Several epithets strictly applicable to Shiva are usere for Ganapati. In the present Stotra 'अर्धेन्दुशेखर, 'नागोपवीत' (V. 19) are some such epithets.

The myth regarding Ganapati being the writer of the Mahabharata (V. 95) and the story of Ganesha cursing Chandra (V. 96. 97) also form a part of the latter portion.

The fervent appeal and frank confessions contained in verses 10'. I05 are particularly noteworthy.

The language is simple and generally free from bombast. Use of words like बहिर्मुख or कुधर in preference to other simpler synonyms are only exceptions. Compounds are straight and simple even when long, at times, as in सूर्यायुतप्रकटदीप्तिविसारशोभिन (V, 20) or भक्तावनित्यपरिपालनकार्यदक्ष (V. 37), Instances like दण्डोपरोधनसुखं (V. 85) are very few, The style is easy-flowing and never burdened by int-ricate imagreies or figures of speech. A conscious attempt at alliterations is noticeable at certain places (V. 35). सुभाषित like अर्थान्तरन्यास are conspicuously absent. The only exception, perhaps being of v. 70

Generally the thought-content here is independent and the poet has repeated only his own lines and ideas from other stotras, Only V. 25

विघ्नैर्मुहुर्मुहुरपि प्रतिहन्यमानाः
प्रारोप्सिताद्धि बहवो विरमन्ति मूढाः ।

and the following verse echo the words and contents of the famous सुभाषित of भर्तृहरि viz.

आरभ्यते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्नविहता विरमन्ति मूढाः ।
विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः
प्रारब्धमुत्तमजना न परित्यजन्ति ।।

The fixed form of 108 verses with the MUKUTA at the end of each verse, brings in some artificialities in the composition. Thus in 75-76 and 80-81 the Mukuta intervenes the continuity of the expression. Often, the Mukuta ill-fits the context. (See Verses 85 to 91). Repetitions seem to be inevitable for stretching the otherwise meagre content to the length of 108 verses. Having chosen the Shataka form the poet had to accept these artificial features. By adding more explanatory stories for Ganesha's epithets like 'एकदन्त' 'विकट' etc. and by relating some more Ganesh myths the repetitions could be avoided as the poet's style is particularly suitable to narrative content.

Many of the extant Ganapati stotras are ritualistic in content. The present stotra is different in that it combines in it, sincere religious feeling with an equally sincere urge for literary expression. शिवेतरक्षति is one of the recognized aims of poetry. The poet aspires to attain the same through the hymn. His pious wish that the readers, too, should be rewarded with 'धी' and 'आत्मतुष्टि' speaks for his strong conviction that poetry can achieve this purpose.

Hyderrbad Nalini Sadhale
11-3-84

Dr. A.N. VARKHEDKAR, M.A.. Ph-D.
Sanskrit Lecturer,
Osmania University,
Hyderabad-500 007,

प्रस्तावना

अगजातनुजातोऽसौ दिविजैरभिपूजितः ।
तेजोनीराजितो देवो विघ्नराजो विराजते ॥

अनवरततपोनिरतानां शमदमाद्युपेतानामस्माकं प्राचीन-पूर्वजानां परमानुग्रहेण अनवद्यब्रह्मविद्याविद्योतिता हृद्या भारतीया विचारधारा अद्यापि हृदयपद्यायामारोपिता सांसारिकं तापत्रयमपास्य कमप्यान्तरिकमनिर्वचनीयं सात्त्विकं सुखं समाधानं च कलयतीति विदितमेव समेषाम् । धर्ममर्मज्ञैः काव्यनिर्माणकर्मकुशलैर्भगवत्कृपैकवर्मभिः श्रीसुन्दरशर्मभिर्विरचितानि श्रीनिवासशतकप्रभृतीनि शतकस्तोत्राणि देवतोपासकानां भक्तवाचकानामिव कवितापीयूषपानोत्सुकानां रसिकानामपि मनसि पाठंपाठमपारमानन्दं जनयन्तीत्यत्र अनुभूतिरेव प्रमाणम् । तेषामेवाभिनवकृतेर्बिघ्नराजशतकस्य प्रस्तावनां प्रस्तोतुकामोऽहं प्रथमतः सुकविमहोदयेभ्यः श्रीसुन्दरशर्मभ्य एतादृशावकाशदानेनोपकृतवद्भ्यो मदीयं कृतज्ञताभावमावेदये । षोडशवर्षीयोऽ-

स्माकं परिचयतरुः परिणतप्राय एवेति मन्ये । तस्यैवायं फलोदयो यदधुना श्रीसुन्दरशर्मभिः वचोनिचयनीराजनया विघ्नराजमाराधयितुमादिष्टोऽस्मि ।

इतः पूर्वः श्रीनिवासशतकप्रभृतीनि पंच शतकानि सुकविभिरेभिः प्रकाशतां नीतानि । तेष्विव प्रकृते विघ्नराजशतकेऽपि सुन्दरशर्मणां भक्तिरसमधुस्यन्दसंदानितः सुन्दरः पदबन्धो महानन्देन हृदयमास्कन्दते ।

विशिष्य इष्टा अधिकृता च खलु देवता विशिष्य वन्द्या भवति इति शास्त्रकारा ऊचुः । विघ्नराजस्तु तथाविध एव । सर्वासु देवतासु प्रथमाभिवन्दनीयतया विशिष्टः, निखिलापेक्षितस्य कार्यसाफल्यसमाप्तिप्रतिबन्धकविघ्ननिरासस्य कर्तृतया इष्टः, प्रकृतशतकप्रतिपाद्यतयाऽधिकृतश्च विघ्नाधिराज इत्यत्र को वा मतिमान् लेशतोऽपि संशयीत ।

सतीष्वनेकासु देवतासु विघ्नराजो नूनमनितरसाधारणो विराजते । यः कोऽपि वा भवतु सम्प्रदायः, यत्किमपि वा भवतु मतम्, या काऽपि वा भवतु पूजाविधिः, प्रथमं प्रमथगणनाथः सम्प्रार्थ्यते । तस्य हि कृपाकटाक्षनिक्षेपेणैव क्षितिधरसमानाऽपि विघ्नराशिः क्षणादेव सन्धुसिता भावतीति भारतीयानां भावना । न केवलं भारते, किन्तु चीनजपानजावासुमात्राप्रभृतिषु देशान्तरेष्वपि गणेशपूजायाः प्रचारो लोचनगोचरीभवति ।

चित्रं रूपं, अतिविचित्रं चरित्रं, अनन्यसामान्यो जगन्मान्यो

गुणगणः, इति सर्वमेव विलक्षणं गणनाथस्य । अत एव नैके विचारचतुराः पाश्चात्याः पौर्वात्याश्च विपश्चितो विघ्नराज-विषये बहुशो लेखनीं व्यापारयामासुः ।

द्विविधा खलु विचारधाराऽत्र प्रसरति । गणेशो नाम मूलतो वैदिकदेवता इत्येका, मूलतः काचिदनार्यजातिदेव-तैवोत्तरकाले वैदिकसम्प्रदाये विशिष्टं स्थानमध्यतिष्ठदिति चापरा विचारधारा द्रष्टव्या ।

इदमत्रावधेयम् । प्राचीनभारतीयपरम्परातः प्राप्तेषु सम्प्रदायेषु शैववैष्णवशाक्तसम्प्रदायानां प्राधान्यमवलोक्यते । सम्प्रदायान्तराणि सर्वाणि एष्वन्यतमेन सम्बद्धान्येवेति गौणान्यु-च्यन्ते । यथा गाणपत्यनारसिंहवाराहप्रभृतयः सम्प्रदाया शैववैष्णवशाक्तेष्वन्यतमेन द्वाभ्यां त्रिभिर्वा सम्बद्धा एव प्रसार-मासादयामासुः । प्रायः ग्रन्थारम्भे विघ्नपरिहाराय विघ्नाधि-राजस्य प्रणामो युक्तियुक्तः, दृश्यते च तथा नैकेषु ग्रन्थेषु, प प्राचीनसंस्कृतसाहित्ये विरलमवलोक्यते नाम लम्बोदरस्य । संस्कृतनाटककारेषु प्रथमं भवभूतिनैव चीत्कारवत्यो वैनायक्यो वदनविधुतयो वर्णिताः समुपलभ्यन्ते । कालिदासादीनां रचनासु पुनर्गणेशस्य नामापि न श्रूयत इति परमाश्चर्यम् । एतेनेदमनु-मीयते यन्मातङ्गमुखस्य देवस्य गणपतेर्वर्तमानं रूपं स्थानं च विशिष्टदेशकालयोः समुदभूदिति । सम्भवतः आर्यानार्यसंस्कृत्यो-आचारविचारविनिमयोपलक्षितः सम्मेलनकाल एव शिवबालस्य सम्मानकाल इति इतिहासबिदो वदन्ति ।

एकतो विघ्नाधिराजस्य वामनाकारा, तुन्दिला च तनुर्यक्षजातिलक्षणान्यनुकरोति, अपरतो गजमुखं पशुपूजासम्प्रदायसम्बन्धमनुबध्नाति। यर्हि शिवपुत्रता शैवानुयायिदेवतात्वेन गणनाथं प्रथयति तर्हि सर्वासु वैदिकलौकिकक्रियासु दीयमानः प्रथमपूजासम्मानो वैष्णवादिसकलसम्प्रदायसाधारणीं कामपि महत्तां सूचयति। अत एव बहुशो विषयममुं परामृशतामपि विदुषां मनो न किमपि निर्धारयितुं पारयति।

पौराणिककथासु पुनरयं विषयो नैकप्रकारेण निरूपित उपलभ्यते।

गणेशो नाम महादेवस्य शिवस्य मानसः पुत्र इति, अंगमलसंवळितेनोद्वर्तनेन निर्माय समुज्जीवितो जगदम्बायाः प्रीति–पात्रमपत्यमिति, पार्वत्याः स्नेहरसपूरपूरितेनान्तःकरणेन पुत्रनिर्विशेषमुपलालितो गणमुख्य इति एवमन्यैश्च प्रकारैर्गणपतिवृत्तान्तः पुराणेषु वर्ण्यते।

विघ्नाधिराजस्य विद्यमानं रूपं प्राचीनाचारविचारधारायाः मूलाधारभूते ऋग्वेदे तावन्नोपलभ्यते। भारतीयपरम्परानुसारं गणेशपूजायां द्वौ ऋग्वेदीयौ मन्त्रौ प्रयुज्येते। तयोरेकस्मिन् बृहस्पतिः अपरस्मिन्पुनरिन्द्रस्तोष्टूयते। द्वयोरपि मन्त्रयोः गणपतिपदप्रयोगो दृग्गोचरीभवति, परं स विशेषणविधयैव। ऋचां गानेन महेन्द्रबलमभिवर्धयतां गणानां, मन्त्रसमूहस्य, बुद्धेश्चाधिपतिर्बृहस्पतिरिति श्रुतिवचनेनाऽवगम्यते। किं च

मरुद्गणानां पतिर्भववा, तत एव गणपतिरिति श्रुतिषु समुपवर्ण्यते । तदेवं प्रसिद्धयोर्मन्त्रयोः प्रयुज्यमानः गणपतिशब्दः न कथमपि गजमुखं विघ्नराजं बोधयतीति सुविलोकम् ।

औपनिषदवाङ्मये केवलं गणपत्यथर्वशिरसि विघ्नराजस्य परब्रह्मतया वर्तमानाकारेण च वर्णनमुपलभ्यते । परमुपनिषदियमत्यन्तमर्वाचीनेति कथयन्तः कमप्यनादरमाविष्कुर्वन्ति समालोचकाः । तथापि अथर्ववेदसम्बन्धिनीयमुपनिषद् विघ्नराजस्य मूलतः अथर्ववेदसम्बन्धिदेवतात्वं सूचयतीति वक्तुमस्त्यवकाशः । मन्त्रतन्त्रप्रयोगाभ्यां भूतप्रेतादिसाधनाविधि प्रतिपादयताऽथर्ववेदेन सह भूतनाथस्य विघ्नकर्तुर्गजमुखस्य देवस्य सम्बन्धः सुतरां सम्भाव्यते । शिवस्येव विघ्नराजस्यापि मूलतो विघ्नकर्तृत्वेन भयकारि रौद्रं रूपमेव लोकविदितमासीत् यत्पूजापुरस्कारेण प्रसन्नं परमोपकारितया विघ्नहरणकारणं सत् लोकहिताय बभूवेत्यपि विज्ञायते । अथर्ववेदोऽपि नूनं भैषजाभिचारिकप्रकरणाभ्यां हिताहितकारितया शुभमशुभं च रूपं धारयतीति मतिमतामनुमतं मतम् ।

गजाननो विघ्नराजः चतुर्णां वैदिकदेवतानां मरुतां, रुद्रस्य, वृहस्पतेः, इन्द्रस्य च संवलितं रूपमिति केचिदितिहासविदो वदन्ति । पशुरूपोपमाप्रदानेन विघ्नराजस्य गजाननता प्रसिद्धा बभूवेत्यपि तेषामाशयः । दृश्यते खलु जातवेदसो वृषभरूपेण, सूर्यस्य च सुपर्णरूपेण वर्णनं ऋग्वेदमन्त्रेषु । ऋग्वेदे मरुतां इन्द्रस्य च हस्तिना सह क्रियमाना तुलना

गणनायकस्य गजाननतायाः मूलं सूचयति इत्यपि सम्भाव्यते। अपरो विद्वान् H Heras सनत्कुमारं स्कन्दाभिन्नमध्यवस्यन् स्कन्दस्यैव विकसितं रूपं गजाननो गणपतिरिति कथयति।

डॉ. सम्पूर्णानन्दप्रभृतयो विद्वद्वराः शिवाभिन्नमेव गजाननगणपतिमध्यवस्यन्ति। 'तत्पुरुषाय विद्महे वक्रतुण्डाय धीमहि। तन्नो दन्तिः प्रचोदयात्' इति तैत्तिरीयारण्यकगतो मन्त्र एवात्र प्रमाणमिति तेषामाशयः। तैत्तिरीयसंहितायां "आखुस्ते पशुः" इति रुद्रविषये कथनात् गजाननगणपतेराखुवाहनता कथञ्चित्सूचिता भवति। पौराणिकवचनान्यपि कानिचित् शिवगणेशयोरभेदमुपपादयन्ति इति द्रष्टव्यम्। भैरवनाम्ना लोकविदितं शिवरूपमेव मू[illegible] गजाननगणपतेरिति मतमपि विचारणीयम्।

एतावता गणपतेर्गजाननस्य मूलतो वैदिकदेवतात्वमभ्युपगच्छतां बुद्धिमतां मतान्युपपादितानि। अधुना पुनरपरां विचारधारामनुसरतां मतं निरूप्यते। गजाननो गणपतिरवैदिकी काचिदनार्यजातीया देवता इति तेषामभिप्रायः। हिमालयपरिसरे निवसन्तीषु कासुचिदनार्यजातिषु महाबलशालिनो गजस्य पूजा प्रचलिताऽऽसीत् या कालान्तरे वैदिकसम्प्रदायानुयायिभिरङ्गीकृता गाणपत्यसम्प्रदायं प्रवर्तयामास इति तेषामाशयः।

अयमत्र विचारक्रमः – वन्यजातिषु प्रचलितया पशुपूजया रीतिभिश्च सह गजाननगणपतेः सम्बन्धो बभूव इति तावत्

गजमुखतया मूषकवाहनतया च निर्विवादमुदितं भवति। गहनवतीषु तरुतले कदाचित्पशुदेवताविशेष इति पाषाणनिर्विशेषस्य गणेशस्य पूजां वन्यजातीया जनाः मानवबलिदानादिना रक्ताभिषेकादिविधया निर्वर्तयामासुरिति न खलु नाम न सम्भाव्यते। सिन्दूरलेपो हि तस्या एव रीतेरवशेष इति वक्तुमस्त्यवकाशः। सेयमनार्यदेवता कालान्तरे वैदिकदेवतया बृहस्पतिना सह कुतोऽपि प्रमादात्तादात्म्यमापादिता क्रमेण वैदिकदेवतासु प्रधानं स्थानमाससाद। इयमेव घटना, विष्णुना, गणपतेर्गजमुखता समापदितेति पौराणिककथया संसूच्यते इत्येवमेतत्मतपरिष्कारप्रकारः।

विषयेऽस्मिन् सातवळेकरमहोदयानां कल्पना तु सुतरामन्यादृशी। भूतस्थानाधिपतेः शिवस्य प्रजासु केचन जनसमूहाः विभिन्नजन्तूनां कृतकमुखानि मुखोपरि धारयित्वा तत्तन्मुखधारिविशिष्टदेवतानुयायित्वेन प्रसिद्धिमधिजग्मुरिति सम्भाव्यते। केरलेष्वद्यापि प्रथेयं प्रचलति। कश्चन जनसमूहो मातङ्गमुखधारी सन् तादृशीमेव देवतामपूजयत् या कालक्रमेण गजाननगणपतिरूपं प्रापदिति तेषामाशयः।

अथर्वशिरसि 'नमो व्रातपतये' इति निर्देशोपलम्भात् 'संस्कारहीनो व्रात्य' इति च बौधायनसूत्रे कथनात् गजाननगणपतिः व्रात्यानां देवता सम्भवतीति प्रो. आणेमहोदयाः प्रत्यपीपदन्।

प्रतीकात्मकं विघ्नराजस्य रूपमित्यपि नैके विचारचतुरा निश्चिन्वन्ति । केचन धान्यस्य प्रतीकभूता धान्याधिदेवतेति, अन्ये प्रातरुदीयमानस्य सूर्यबिम्बस्य सूचकं दिव्यरूपमिति, अपरे बुद्धिशक्तेरधिदेवता इति, केचिद् वेदमूलभूतस्योङ्कारस्य देवतात्वेन परिकल्पितः कश्चिदाकारविशेष इत्यादि बहुविधं कथयन्ति ।

वस्तुतस्तु वैदिकी बुद्धिदेवता बृहस्पतिरेव इन्द्ररुद्रमरुतां सम्बन्धेन विद्यमानं गजाननगणपतेरलौकिकं विलक्षणं च रूपं कालक्रमेण प्राप इति तर्कसङ्गतं युक्तियुक्तं च प्रतिभाति । नैका वैदिकदेवताः पूर्वमविदितप्राया अपि पौराणिककाले लोकप्रसिद्धिमधिजग्मुरिति नाविदितं विदुषाम् । यद्वेदेषु नोल्लिखितं तत् कदापि भारतीयसम्प्रदायसिद्धं न भवतीति वचनं तु वेदानामानन्त्यस्य तत्र तत्रासकृदुपपादित्वात् न युक्तियुक्तमिति द्रष्टव्यम् । किञ्च चित्रविचित्रदेवतारूपनिरूपणपरेण भारतीय–प्राचीनपरम्पराप्रवाहे श्रद्धैव सर्वोपरि वर्वर्तीति सावधारण-मवधेयम् ।

अनितरसाधारणीं श्रद्धामाधाय निर्मितमिदं विघ्नराज-शतकं गणेशविषये विद्यमानाः सर्वा अपि भ्रान्तकल्पनाः सुदूरम-पसारयितुं समर्थमिति सुतरां भावये ।

कविवरेण्यैः श्री सुन्दरशर्मभिः भक्तिपरवशतया रुचिरमुपवर्णिता विघ्नाधिराजस्य सर्वातिशायिनो लोकविख्याताश्च गुणाः सर्वेषां मनो मोहयन्ति ।

लौकिका अलौकिकाश्च मानवीयव्यवहाराः सर्वेऽपि ज्ञानमूला एवेति शास्त्रसम्मतं मतम् । न हि घटमजानानाः जनाः जलाहरणाय घटमुपयुञ्जानाः दृश्यन्ते । ज्ञानदाता च विघ्नाधिराज इति ज्ञानप्राप्तये स एव शरणीकरणीयः । वर्णितं चैतदेवं कविना—

ज्ञानाप्तिसाधनमथेह वदन्ति विद्यां
सा च प्रभो तव कृपावशतो हि लभ्या ।

अत एव ज्ञानसाधनीभूतपठनपाठनाद्यारम्भे प्रमथनाथप्रार्थना सिद्धिमादधातीति गीयते ।

नित्यं त्वदीयचरणाब्जयुगं प्रणम्य
यस्त्वारभेत पठनादिसुकर्मजातम् ।
सत्यं स सिद्धिमुपयाति परैर्दुरापां
विघ्नाधिराज! विनमज्जनकल्पभूज ।।

सत्यपि साधनसमुदाये, समर्थेऽपि च कर्तरि विघ्नवशादसफलं भवति कर्म इति तावत् सार्वजनीनानुभवसिद्धम् । विघ्नेश एव

तादृशविघ्नराशिनाशने कुशलः समर्थश्च । इदं तत्त्वमप्यसकृदुपपादितं कविना–

सर्वान्तरायहरणे च निरन्तरायं
यत्प्राभवं सुविदितं हि समग्रविश्वे ।
तत्पादयुग्ममथ ते निरतं भजामि
विघ्नाधिराज ! विनमज्जनकल्पभूज ।।

प्रतिपद्यमनुवर्तमानं मुकुटचरणमपि अनितरसाधारणममुं गणपतेर्गुणविशेषं निरूपयति ।

गणपतेः श्रवणविधूनने कारणमुत्प्रेक्षमाणस्य कवेः कल्पना सहृदयानां हृदयमावर्जयति । तद्यथा–

श्रोतुं च नार्हमथ यद्भवतीह लोके
पापिष्ठजन्तुचरितं तदहो महात्मन् ! ।
मन्येऽपवारयसि कर्णविचालनेन
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ।।

अहो सहजता, सरलता, रमणीयता च कल्पनायाः ।

न केवलं कविकल्पनायां किन्तु श्रुतिस्मृतीतिहासपुराणादिवचनपर्यालोचनायामपि चतुरा विराजते प्रतिभा कविवराणाम् ।

'विज्ञानं ब्रह्म' इत्यादिश्रुतिभिः ज्ञानस्वरूपता 'स सर्वज्ञः' इत्यादिवचनैश्च ज्ञानाश्रयता भगवतो निरूप्यते। भक्तकृते तु ज्ञानदातृतैव भगवतो महान् गुणः। न खलु महानपि धनिको धनदानाप्रवृत्तो लोकानां माननीयो भवति। अयमाशयो निपुणमाविष्कृतः कविना स्वरचनायाम्। तथा हि–

त्वां ज्ञानरूपमिह चाहुरमी हि लोकाः
ज्ञानाश्रयं गणपतिं विबुधाश्च केचित्।
ज्ञानप्रदातृवरदेवमहं तु वेद्मि
विघ्नाधिराज ! विनमज्जनकल्पभूज !॥

संस्मरणमात्रेण सकलदुरितानि दूरीकुर्वन् आशुतोषो भगवान् विघ्नराजः महत्तरतपोऽनुष्ठानप्रसाद्यदेवतान्तरापेक्षया शरणीकरणीय इति सुष्ठु प्रपञ्चितमधस्तनपद्येषु–

बर्हिर्मुखा बहुविधा ननु सन्तु नाम
किं तैस्तपोभिरनिशं खलु यान्ति तोषम्।
तोषं त्वमेषि किल संस्मरणेन सद्यो
विघ्नाधिराज ! विनमज्जनकल्पभूज !॥

विघ्नान्निहन्तुमिह कोऽस्ति समग्रविश्वे
त्वामन्तरा शिवकुमार ! गणाधिराज !।
तेनैव हि प्रथमतः परिपूज्यसे त्वं
विघ्नाधिराज ! विनमज्जनकल्पभूज !॥

"नित्यं प्रसन्नवदनो नमतामसि त्वम्"

"विघ्नान्निहत्य परिरक्षसि सर्वलोकान् "

इत्यादीनि पद्यान्यत्रानुसन्धेयानि ।

हस्तिमुखस्य मोदकहस्तता समस्तभक्तेभ्यो मोददान–प्रयुक्तेति कथयता कविना किञ्चिदिव स्वारस्यमेव समुदञ्चितं पदव्याख्याने । तदुक्तम्–

मोदं ददासि निजभक्ततर्तेर्हि नित्यं
सर्वान्तरायपरिहारमुखेन यस्मात् ।
संकथ्यमे तदिह मोदकहस्तनाम्ना
विघ्नाधिराज ! विनमज्जनकल्पभूज ।।

चित्रचरित्रस्य विचित्रवेषभूषाभूषितवपुषो भगवतो भवानीभवसम्भवस्येभमुखस्य जन्मवृत्तान्तविषये प्रागुपदर्शित-दिशा न केवलं विद्वत्सु परं पुराणग्रन्थेष्वपि मतभेदो वर्तते इति स्पष्टं ज्ञायते । भक्तानां कृते नैष मतभेदः श्रद्धां प्रतिबध्नाति । जीवने प्रतिपदमनुभूयमानां नगनन्दिनीहृदयानन्दनस्य नन्दनस्य सिन्धुरवदनस्य महामहिमशालितां को नामापलपेत् । जन्मविषये सत्यपि मतभेदे विविधसम्प्रदायसिद्धां शिष्टाचारपरम्पराधिगतां च प्रमथनाथस्य प्रथमबन्द्यतां को ना निवारयितुमीष्टे ।

अयमभिप्रायः कविना साधु समुट्टङ्कितो विलोक्यते। तथा चोक्तम्–

दिव्यं त्वदीयचरितं बहुधा हि लोके
पौराणिकास्तदितरे च बुधा वदन्ति।
का वाऽस्तु ते जननरीतिरथादिवन्द्यो
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

पद्यप्रबन्धेषु विशेषतः स्तोत्ररचनासु मध्य एव विषयसन्निवेशदृशा अनुद्वेगकारि यथा भवेत्तथा कथारूपवृत्तान्तवर्णनं विलक्षणं कविकौशलमपेक्षते। कथाप्रवाहनिर्वाहे नीरसता, प्रकृतरसपरिपोषप्रतिबन्धः कुतूहलशैथिल्यं चेत्यादीनि सुतरां परिहरणीयानि। यावदपेक्षितं तावदेव घटनावर्णनं विधाय मनोहारिपदविन्यासेन सहृदयहृदयमन्दिरे प्रवेशं कुर्वाणा श्रीसुन्दरशर्मणां पद्यमयी कथाकथनप्रणालिः न केवलं विदुषां परं परेषामपि तोषाय कल्पेतेति तेषां कविवराणां विघ्नराजजन्मवृत्तान्त–वर्णनपराणां वचनानां पर्यालोचनया निश्चीयते। "सृष्ट्वा हि पिष्टमयं" इत्यतः प्रारभ्य "मातापि ते प्रमुदिता नगराजपुत्री" इत्यन्तैः पद्यैः कविना गणनायकजन्मवृत्तान्तः साधु समुपवर्णितः।

हस्तिमुखस्य वरदहस्तेन समनुगृहीतः कविरयं इत्यत्र नास्ति सन्देहः। अर्थालङ्काराणामिव शब्दालङ्काराणामपि प्रयोगे कौशलमुपदर्शितं कविना। अधस्तनपद्ये नृत्यवत् ललितपदविन्यासमधुरो वृत्त्यनुप्रासो रुचिरं स्फुरति।

नागोपवीत! नगराजसुताकुमार!
वीराधिवीर! विकट! प्रकटप्रभाव!।
तेजोनिधे! दिविजवन्द्यपदाम्बुजात!
विघ्नाधिराज! विनमज्जनकल्पभूज!॥

रत्नाकरात् कियन्ति नाम रत्नानि विचेयानि। कविवर्यैर्विरचितेषु शतकेषु नूनं सर्वाण्येव पद्यानि रत्नवत्प्रकाशन्ते। प्रकृते विघ्नराजशतके विद्यमानानि पद्यान्यपि सहृदयैः पठनीयानि वारं वारमास्वादनीयानि चेत्यत्र नास्ति संशयलेशस्याप्यवकाशः। स्थालीपुलाकन्यायेन केषांचित् पद्यानां निरवद्यरसास्वादः सुधियां मोदायोपायनीकृतः।

एवमेव चिरकालं सुकवितानिर्माणकर्मणा सर्वेभ्यो शर्म वितरन्तु श्री सुन्दरशर्माणः इति आशासे।

अन्ते श्री सुन्दरशर्मणामेव वचनेन राजाधिराजादिभिः सादरमाराधितं विघ्नाधिराजं सम्प्रार्थ्य विरमामि—

ये चापि ते चरितसारमिदं गणेश !
भक्त्या पठन्ति शतकं हि नरोत्तमास्तु ।
तेभ्यः प्रयच्छ विमलां धियमात्मतुष्टिं
विघ्नाधिराज ! विनमज्जनकल्पभूज ॥

विश्वम्भरार्पणमस्तु ॥

हैदराबाद्
10–5–84

आ. न. वरखेड्करः

श्रीः

विठलदेवुनि सुन्दरशर्मणा विरचितं

विघ्नाधिराजशतकम्

–×–

गुरुस्तुतिः

प्रणमामि गुरुं नित्यमज्ञानध्वान्तभास्करम् ।
यत्कृपावशतो मन्दो ध्रुवं जायेत सत्कविः ॥
अज्ञानतमसा व्याप्तं जायेतेदं जगत्त्रयम् ।
यदि नाम गुरुर्न स्याद्दिव्यज्ञानैकदीप्तिदः ॥
गुरोः कृपाविशेषेण चोद्बुद्धा कविता मयि ।
तत्प्रभावविशेषेण मया 'सुन्दर'शर्मणा ॥
अष्टोत्तरशतैः पद्यै'र्विघ्नेश'पदभूषितैः ।
'विघ्नाधिराजशतकं' भक्तिपूर्णं विरच्यते ॥
ये चात्र सुगुणास्ते तु गुरोराशीर्विशेषतः ।
मदीयाज्ञानजा दोषाः क्षन्तव्यास्ते मनीषिभिः ॥

पितृस्मृतिः

मेधाविभवसम्पन्नानस्मद्वंशैकमौक्तिकान् ।
विशुद्धाचारसम्पन्नान् ज्योतिःशास्त्रविशारदान् ॥
वीरास्वाम्यपराख्यांश्च वीरराघवशर्मणः ।
नत्वा श्रीमत्तातपादान् स्मृत्वा तच्चरणद्वयम् ॥
मज्जीवनाधारभूतां वात्सल्यामृतवर्षिणीम् ।
'श्रीगौर्यम्बां' च जननीं प्रणमामि सहस्रशः ॥

शतकप्रारम्भः

1. श्रीविघ्नराजमतुलं हृदि भावयामि
प्रारिप्सितस्य शतकस्य समाप्तिकामः ।
विघ्नान्निवारयतु सोऽयममेयरूपो
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

2. विघ्नेश ! लोकहित ! देव ! सहस्रकोटि-
भानुप्रकाश ! पुरुहूतमुखामरेड्य ! ।
ज्ञानात्मकेशतनयागसमानधैर्य !
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

3. मह्यं च ते स्तवनयत्नपराय देव !
संकल्पितेष्टवरसिद्धिमथ प्रदेहि ।
विघ्नापनोदनपुरस्सरमादिवन्द्य !
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

4. का नाम ? ते गुणनिधे ! स्तवने ममास्ति
शक्तिर्गणेश ! ननु मन्दमतेर्महात्मन् ! ।
आनन्दमेहि मम बालवचो निशम्य
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

5. वाञ्छामि नाहमगराजसुताकुमार !
कीर्त्ति महाकविवरैंरतिमात्रमर्थ्याम् ।
नो कामयेऽन्यदिह ते करुणावलोका-
द्विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

6. हेरम्ब ! मोदकर ! मोदकहस्त ! भक्त-
संघार्त्तिसंहरण ! विघ्नविनाश ! मे हि ।
बुद्धिं विकासय तवेह नुतौ प्रवृत्तां
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

7. लम्बोदर ! प्रणतभक्तभयापहारिन् !
को नाम ? साम्यमथ याति हि ते नु विश्वे ।
भक्तौघपालनविधौ च निरन्तरायं
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

8. नानाविधानथ भवान्ननु विघ्नसंघान्
दूरीकरोति; तत एव निरन्तरायम् ।
त्वद्भक्तहस्तमयते सकलार्थसिद्धि-
र्विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

9. कल्याणदायि निरतप्रकटप्रभाव-
मिष्टार्थदानचतुरं भुवनैकपूज्यम् ।
अन्यन्न मेऽस्ति शरणं चरणं विना ते
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ।।

10. नाहं कविर्न खलु शब्दविकासवेत्ता
वेदान्तशास्त्रसुविचारमहं न जाने ।
आलम्बनं त्वमिह देव मम प्रयत्ने
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ।।

11. नाम्नैव 'सुन्दर' इति प्रथितोऽस्मि देव !
सौन्दर्यमस्ति न हि किञ्चिदपीह वाचि ।
कः प्रौढिमा तव गुणस्तवने हि मेऽस्ति
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ।।

12. वाणी प्रभावमहिता च विरिञ्चिकान्ता
मद्वाचि वासरसिका मयि सुप्रसन्ना ।
कल्याणदा भवतु वाग्विभवप्रदात्री
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ।।

13. ईशोऽसि सर्वजगतां प्रथमाभिवन्द्यः
पुत्रोऽप्यसि त्वमथ देव ! जगन्नियन्तुः ।
माता च ते भुवनवन्द्यपदारविन्दा
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

14. बुद्धेः प्रभुस्त्वमसि देव ! दयासमुद्र !
धीकांक्षयाऽहमधुना शरणं गतस्त्वाम् ।
कारुण्यतस्त्वनुगृहाण मतेर्विकासं
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

15. का पूजना ? भगवतस्तव चादिमस्य
का नाम ? ते स्तुतिरुदारहृदन्तरस्य ।
नीराजनाविधिरिवेह नु भास्करस्य
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

16. हेरम्ब ! भूतगणसेवित ! भूतनाथ !
मत्तेभवक्त्र ! शशिकान्तिसमानगात्र ! ॥
लम्बोदर ! त्रिभुवनेश ! कृपां विधेहि
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

17. मत्तेभवक्त्र ! मदनारिकुमार ! वीर !
स्कन्दाग्रजात ! कमलाप्तसमानतेजः ! ।
हेरम्ब ! भूतगणनाथ ! कृपासमुद्र !
विघ्नाधिनाथ ! विनमज्जनकल्पभूज ! ॥

18. त्वं क्वासि देव ! निखिलामरवन्द्यपाद !
क्वाहं विमूढमतिरस्मि गणाधिराज ! ।
का वा च शक्तिरिह मे नवनेऽस्ति देव ?
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

19. अर्धेन्दुशेखर ! महाबल ! भूतनाथ !
नागोपवीत ! गिरिराजसुतातनूज ! ।
वक्रास्य ! देव ! विमलेन्दुमरीचिगात्र !
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

20. कात्यायनीवरकुमार ! करीन्द्रवक्त्र !
सूर्यायुतप्रकटदीप्तिविसारशोभिन् ! ।
सर्वामरैश्च जनिमद्भिरथादिवन्द्य !
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

21. वर्हिर्मुखा वहुविधा ननु सन्तु नाम
किं तैस्तपोभिरनिशं खलु यान्ति तोषम् ।
तोषं त्वमेषि किल संस्मरणेन सद्यो
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

22. ज्ञानाप्तिसाधनमथेह वदन्ति विद्यां
सा च प्रभो ! तव कृपावशतो हि लभ्या ।
याचे नु तां करुणयाऽनुगृहाण मह्यं
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

23. लोके यदस्ति सदसन्ननु कार्यजातं
प्रायः सविघ्नमखिलं सहजं किलैतत् ।
पूज्योऽसि विघ्नविनिवारणतो महात्मन् !
विघ्नाधिराज ! विनमज्जनकल्पभूज! ॥

24. प्रारिप्सितं यदपि कार्यमिहास्ति लोके
सर्वं सविघ्नमथ देव ! तव प्रसादात् ।
सम्पत्स्यते सकलमेव च विघ्नदूरं
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

25. विस्मृत्य तावकमहामहितप्रभावं
विघ्नैर्मुहुर्मुहुरपि प्रतिहन्यमाना: ।
प्रारिप्सिताद्धि वहवो विरमन्ति मूढा
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

26. विघ्नान्निहन्तुमिह कोऽस्ति समग्रविश्वे
त्वामन्तरा शिवकुमार ! गणाधिराज ! ।
तेनैव हि प्रथमत: परिपूज्यसे त्वं
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

27. माता च का ? तव गणेश ! पिता च कस्ते ?
संकल्पतस्तु शिवयो: समभू: किल त्वम् ।
लोकातिगोऽसि ननु पूज्यवरोऽसि तस्मा-
द्विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

28. विघ्नेश ! सन्ति विबुधा बहवो हि किन्तै: ?
सम्पूजिता ननु भवन्ति न वा प्रसन्ना: ।
नित्यं प्रसन्नवदनो नमतामसि त्वं
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

29. विघ्नेश ! देव ! करुणामय ! दिव्यमूर्त्ते !
हेरम्ब ! दन्तिमुख ! पालितसर्वलोक ! ।
गौरीकुमार ! गुरुविघ्नमपाकुरु त्वं
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

30. विघ्नेश ! सन्ति विबुधा ननु कोटिशो हि
ये त्वन्तरायमपनोदयितुं न शक्ताः ।
विघ्नान्निहत्य परिरक्षसि सर्वलोकान्
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

31. आदौ प्रणम्य ननु ये तु भवन्तमेव
ज्ञानार्थिनश्च पठनाय समारभन्ते ।
ते सर्वशास्त्रनिपुणा अचिराद्भवन्ति
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

32. नित्यं त्वदीयचरणाब्जयुगं प्रणम्य
यस्त्वारभेत पठनादिसुकर्मजातम् ।
सत्यं स सिद्धिमुपयाति परैर्दुरापां
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

33. कात्यायनीप्रियकुमार ! गणाधिनाथ !
दन्त्यास्य ! दन्तिहरदेवकुमाररत्नम् ।
विघ्नान्तकेश ! नमदिष्टवरप्रदायिन् !
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

34. यो वा सकृत्तव हि नाम नितान्तभक्त्या
संकीर्त्तयेत्स्मरति वाऽथ गिरीशसूनो ! ।
यात्येव सोऽयमतुलां सकलार्थसिद्धिं
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

35. सिन्दूरशोभिसुमहत्तरगण्डयुग्म !
नागोपवीत ! नगराजसुताकुमार ! ।
त्रैलोक्यमङ्गलनिदानपदारविन्द !
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

36. शैलात्मजावरकुमार ! गणाधिराज !
दूरीकुरु त्वमथ विघ्नचयाननन्तान् ।
विघ्नौघभञ्जनविधिप्रकटप्रभाव !
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

37. भक्तौघनित्यपरिपालनकार्यदक्षं
सर्वान्तरायपरिमार्जनतः प्रसिद्धम् ।
वन्दामहे तव पदं प्रणतेष्टदायि
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

38. कारुण्यमात्रमवलम्ब्य सदा त्वदीयं
लोके जनाः सकलकार्यमथारभन्ते ।
संसिद्धिमेत्य परमां मुदमाप्नुवन्ति
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

39. कारुण्यतो यदि न रक्षसि भक्तवृन्दान्
घोरान्तरायततिदूषितसर्वकार्याः ।
भीताः कदापि न सुकार्यमथारभेरन्
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

40. शैलाधिराजतनयाप्रथमात्मजात !
शैलादिभृङ्गिमुखशैवगणाधिराज ! ।
शैलाभपापमिह शीघ्रमपाकुरु त्वं
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

41. सर्वान्तरायहरणे च निरन्तरायं
यत्प्राभवं सुविदितं हि समग्रविश्वे ।
तत्पादयुग्ममथ ते निरतं भजामि
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

42. कात्यायनीवदनकञ्जसहस्रभानो !
कालान्तकात्मज ! सुफुल्लसरोजनेत्र ! ।
का वा मतिस्तव नुतौ गणराज ! मेऽस्ति ?
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

43. स्वान्तालयं सकलकल्मषमादिवन्द्य !
शुण्डालदण्डविसरेण गणाधिनाथ ! ।
सम्मार्जयाशु कृपया करुणासमुद्र !
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

44. जाम्बूनदाद्रिशिखराग्रसमानकान्ते !
लम्बोदर ! त्रिभुवनेड्य ! महाप्रताप ! ।
पाहीशपुत्र ! करुणामहितेक्षणेन
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

45. अन्तर्निगूढरिपवो बहवोऽद्य मे हि
स्वान्तं सदा कलुषयन्ति बहुप्रकारम् ।
शुण्डेन तान् प्रशमयाशु शिवात्मजात !
विघ्नाधिराज ! विनमज्जनकल्पभूज! ॥

46. सारङ्गशावकमिवेह वने भयार्त्तं
चिन्ताशतैरनुदिनं परितप्यमानम् ।
विघ्नेश ! रक्ष सकृपं भवसागरान्मां
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

47. श्रोतुं च नार्हमथ यद्भवतीह लोके
पापिष्ठजन्तुचरितं तदहो महात्मन् ! ।
मन्येऽपवारयसि कर्णविचालनेन
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

48. आत्मीयकान्तिनिवहैरमरौघवन्द्य !
स्वच्छैः सहस्रकिरणस्य मयूखकल्पैः ।
अज्ञानरूपतिमिरं हरसि त्रिलोक्याः
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

49. ज्ञानात्मकस्त्वमसि बुद्धिमतामुपास्यो
विश्वैकवन्द्य ! नगजानयनाम्बुजाप्त ! ।
त्वां ब्रह्मरूपमथ वेत्ति जनो हि तस्मा-
द्विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

50. कात्यायनीवरकुमार ! करीन्द्रवक्त्र !
कारुण्यपूर्ण ! कुधरेन्द्रसमानकान्ते ! ।
विश्वामरप्रथमपूज्य ! विभो ! महात्मन् !
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

51. सम्प्रार्थयन् सकलदेवगणाभिवन्द्यं
त्वां मत्तहस्तिमुखमद्रिसुतातनूजम् ।
लोको हि विघ्नहतिशून्यमुपैति सर्वं
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

52. त्वां ज्ञानरूपमिह चाहुरमी हि लोकाः
ज्ञानाश्रयं गणपतिं विबुधाश्च केचित् ।
ज्ञानप्रदातृवरदेवमहं तु वेद्मि
विघ्न.धिराज ! विनमज्जनकल्पभूज ! ॥

53. शम्भोस्तनूज ! शुभकामनया च यस्तु
त्वां प्रार्थयेद्द्विविजवन्द्यपदारविन्द !
सद्यः समेति तदहो स तव प्रसादा-
द्विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

54. यद्यद्गणेश ! शुभकार्यमिहास्ति लोके
तत्रोपतिष्ठति भवान्ननु चादिपूज्यः ।
कार्यं च तत्सफलतामुपयाति चित्रम् !
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

55. अज्ञानदन्तिवरसिंह ! कृपासमुद्र !
दिव्यप्रभाधवलिताश ! दिगीशवन्द्य ! ।
पाहीशपुत्र ! करुणाविभुतादलोकै-
र्विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

56. वर्हिर्मुखा गणपते ! बहवः प्रसिद्धाः
सन्त्येव देव ! बहुधा परिपूज्यमानाः ।
त्वन्त्वग्रपूज्य इति चित्रमहो महात्मन् !
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

57. मोक्षैकसाधनमहो विबुधा वदन्ति
ज्ञानं नु तद्धि भवतः कृपया हि लभ्यम् ।
मह्यं प्रदेहि नगजात्मज ! तच्च नित्यं
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

58. नागोपवीत ! नगराजसुताकुमार !
वीराधिवीर ! विकट ! प्रकटप्रभाव ! ।
तेजोनिधे ! दिविजवन्द्यपदाम्बुजात !
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

59. चिन्तशतैः प्रतिदिनं परिहारशून्यै-
रायासकैरतितरां परितप्यमानम् ।
संरक्ष मां गणपते ! भवनीरराशे-
र्विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

60. नो किञ्चिदस्त्यविदितं न च वेद्यमस्ति
ज्ञानात्मकस्त्वमसि मन्दमतिर्हि चाहम् ।
बुद्धिं विकासय विभो ! कृपया गणेश !
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

61. लोकेश्वरप्रथमसूनुतया प्रसिद्धे
ज्ञानात्मके त्वयि च देव ! विराजमाने ।
अज्ञानरूपतमसो न भवेद्धि राज्यं
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ।।

62. नास्तीह चेत्तव विभो ! विभुता प्रपञ्चे
शैलाधिराजतनयाप्रथमात्मजात ! ।
अज्ञानरूपतमसो हि भवेद्धि राज्यं
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ।।

63. मोदं ददासि निजभक्ततेर्हि नित्यं
सर्वान्तरायपरिहारमुखेन यस्मात् ।
संकथ्यसे तदिह मोदकहस्तनाम्ना
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ।।

64. लोकत्रयीप्रथमवन्द्य ! गणाधिराज !
नागाधिपाभरणपुत्र ! नमज्जनाप्त ! ।
का पाण्डिती तव गुणग्रहणे ममास्ति ?
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ।।

65. भानुप्रकाशशतकोटिविभासमेते
देदीप्यमानवपुषि त्वयि जाग्रतीह ।
का वा प्रसक्तरिह [1]गाढतमोविभूतेः ?
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

66. दिव्यं त्वदीयचरितं बहुधा हि लोके
पौराणिकास्तदितरे च बुधा वदन्ति ।
का वाऽस्तु ते जननरीतिरथादिवन्द्यो
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

67. सृष्ट्वा हि पिष्टमयमेकमपूर्वरूपं
कृत्वा च तं पुरुषपुंगवमम्बुजाक्षी ! ।
चक्रे सजीवमपि पर्वतराजपुत्री
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

68. त्वामेव तं गिरिसुताऽपि निजात्मजातं
मत्वा नियुज्य निजमन्दिरपालनायै ।
स्नानेच्छया गतवती जलमन्दिरं सा
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

---

[1] अज्ञानरूपाया इत्यर्थः

69. पिष्टात्मकस्त्वमथ लब्धशरीरिभावो
मातुः प्रसादवशतो महिमान्वितोऽपि ।
संञ्जात इत्यतिशयो ननु भाग्यराशे !
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

70. सर्वातिशायिभुजवीर्यबलैकसम्प-
त्त्वां वत्र इत्यतिशयो न भवेत्कथंचित् ।
किं वा भवेन्न खलु मातुरनुग्रहाद्धि ?
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

71. संक्रन्दनादिसुरनायकवन्द्यपाद-
पद्मस्य तस्य गिरिशस्य हि शूलपाणेः ।
द्वारे गृहस्य तव रक्षकता करेऽभूत्
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

72. संकल्पमात्रसृजनस्थितिनाशकार्य-
दक्षस्य भोगिनिवहेशविभूषणस्य ।
कालान्तकस्य गृहरक्षणतत्परस्त्वं
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

73. मातुर्निदेशमनुसृत्य तदैव हि त्वं
बद्धादरो भवनमेत्य तदग्रभूमौ ।
अग्रासने समुपविश्य च जागरूको
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

74. कीटोऽपि वा यदि पुमान्न खलु प्रवेश्यः
का वा कथा न्वितरपूरुषपुंगवानाम् ।
संकल्पवाँस्त्वमथ चेत्थमभूर्गणेश !
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

75. यः कोऽपि वा भवतु तद्भुवनाभियायी
तन्तं निरुध्य निपूणं भवनप्रवेशात् ।
मातुर्निदेशमनुपालयति त्वयीत्थं
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

76. नन्द्यादिभिः परिवृतः शशिखण्डमौलि-
र्योगं समाप्य तदनु प्रमथाधिनाथः ।
स्वं मन्दिरं त्रिभुवननेडचमथैच्छदाप्तुं
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

77. विज्ञाय भूतगणनाथमनःप्रवृत्तिं
भ्रूसंज्ञयैव गिरिशस्य स चापि नन्दी ।
प्राचोदयत्प्रमथवर्गमथाग्रयायी
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

78. सर्वैर्गणैः परिवृतस्तदनु प्रकर्ष-
हर्षातिरेकविवशः स्वगृहाभियायी ।
प्रोवाच नन्दिनमगाधिपनन्दिनीशो
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

79. अस्माकमागमनमद्रिवरात्मजायै
देव्यै निवेदय ननु त्वरयाद्य गौर्यै ।
द्रष्टुं हि तां प्रकटमुन्मनसो वयं नु
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

80. इत्थं निशम्य वचनं ननु चन्द्रमौले-
र्गौरीनिकेतनमथेत्य ददर्श नन्दी ।
द्वारि स्थितं पुरुषमेकममोघवीर्यं
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

81. दृष्ट्वा च तं चकितनेत्रयुगः कथञ्चि-
त्संष्टभ्य चात्मविकृतिं प्रविवेश गेहम् ।
मुष्टिप्रहारमथ सोऽपि ददौ च तस्मै
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

82. नन्दी ततः प्रतिनिवर्त्त्य शिवं तदैव
सम्प्राप्य वृत्तमखिलं च यथाप्रवृत्तम् ।
आवेद्य भीत इव दूरमपाससार
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

83. आश्चर्यमेतदिति कालगलोऽपि किञ्चि-
दालोच्य मामकगृहाग्रतलेऽस्ति कोऽयम् ? ।
ज्ञास्यामि चेत्यतिरयेण ययौ गृहाग्रं
विघ्नाधिराज ! विनमज्जनकल्पभूज! ॥

84. गत्वा गृहं पुरुषपुंगवमग्रदेशे
दृष्ट्वा स्वयं चकितदृष्टिरगात्मजेशः ।
कर्त्तव्यमस्ति किमिहेति विचिन्त्य पश्चा-
द्विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

85. द्वारि स्थितं व तमुपेक्ष्य यदा पुरारि-
र्गेहं स्वकीयमविशत्सहसा तदा तम् ।
दण्डोपरोधनसुखं स रुरोध शम्भुं
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

86. कालान्तकोऽपि निजमन्दिरमप्रवेश्यं
विज्ञाय कोपविवशः क्षणमात्र एव ।
तं पूरुषं विगतशीर्षमसौ चकार
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

87. अत्रान्तरे कुधरशेखरनन्दिनी सा
स्नात्वाऽऽगता विगतशीर्षममुं तनूजम् ।
दृष्ट्वा चिखेद विकलं च निनिन्द शर्वं
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

88. शर्वोऽपि शैलदुहिताहृदयान्तराले
जाज्वल्यमानमुदधौ वडवाग्निकल्पम् ।
विज्ञाय शोकमुपसंहृतकोप आसी-
द्विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

89. निह्नोतुमैच्छदभवोऽपि नगात्मजाया
उज्जीवनेन च सुतस्य शुचं हि देवाः ।
शीर्षं समानयदुदक्छयनद्विपस्य
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

90. संयोज्य तद्गजशिरः पुरुषस्य काये
सद्यश्चकार तमसौ गजवक्त्रमेवम् ।
तेजस्विनं सुदृढकायममोघवीर्यं
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

91. तत्तादृशस्त्वमथ भूतगणाधिपत्ये
संस्थापितोऽसि ननु भूतगणाधिनेत्रा ।
भक्तेष्टदः प्रथमपूज्यतमस्त्रिलोक्यां
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

92. माताऽपि ते प्रमुदिता नगराजपुत्री
त्वां भूतनायकमवेक्ष्य पितुः प्रसादात् ।
ज्ञानाधिदैवमकरोत्स्वयमात्मशक्त्या
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

93. कैलासनागपतिदत्तवरप्रभावात्
विघ्नाधिपत्वमथचैत्य बहुप्रकारान् ।
विघ्नान्निहत्य ननु रक्षसि भक्तवृन्दं
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

94. विघ्नेश ! देव तव नाम सकृन्निशम्य
विघ्नाधिपत्वमवगम्य कर्हिहि कश्चित् ।
विघ्नाद्भिया स खलु दूरगतो ननाम
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

95. व्यासश्चकार जयनाममहेतिहासं
तल्लेखने स्वयमभूत्किल शक्तिमान्न ।
तच्च स्वयं लिखितवानसि लोकहेतो-
र्विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

96. त्वां तुन्दिलं नटनसक्तमवेक्ष्य चन्द्रो-
प्याकाशगश्च विकटं विकटं जहास ।
त्वत्तः समाप ननु तेन स चापि शापं
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

97. शापाद्बभूव विधुरप्यवलोकनार्हो
नो शुक्लपक्षगतिथौ च नरैश्चतुर्थ्याम् ।
पश्यन्ति ये तमथ यन्ति महापवादं
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

98. सम्प्रार्थितो जडधिजेन च; यो हि मान्तु
सम्पूज्य पश्यति भवन्तमथापवादम् ।
नैतीति शापपरिवर्त्तनमप्यकार्षी-
र्विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

99. भृङ्गारशैलशिखरं न तु कामयेऽह-
मङ्गारखण्डतुलितं ननु भावये तत् ।
गाङ्गाम्बुवद्विमलभक्तिमथ प्रदेहि
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

100. स्वान्तं मदीयकृत्यतमानमास्ते
सम्पादने सकलसद्गुणजालकस्य ।
मोहान्मतिर्भ्रमति तद्विपरीतमार्गे
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

101. काल्याणदायि निरतं नगजाकलत्र-
सेवापरं भवतु रूपमहो पुरस्तत् ।
आनन्ददं नयनयोर्मम तावकीनं
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ।।

102. स्तोतुं शिवात्मज ! गुणांस्तव नित्यसत्वान्
शोषोऽपि नालमथ कोऽहमहो ! गणेश ! ।
अङ्गीकुरुष्व मम वाचमिवांर्भकस्यं
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ।।

103. नाहं सहस्रवदनो न च कालिदासो
वाल्मीकिरस्मि न हि देव ! वचो विकासे ।
व्यासो न; मन्दमतिरस्मि; कथं स्तवीमि ?
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ।।

104. निर्वर्त्तितं न खलु किंचिदपीह कार्यं
वित्तार्जनाय वहुशो भ्रमितं च नित्यम् ।
आयुर्गतं शिथिलमेतदहो शरीरं
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ।।

105. दाक्षिण्यभावमवलम्ब्य विशेषतो मां
नो रक्षसीह भगवन् ! मयि को गुणोऽस्ति ।
सर्वे गुणा मयि हि दोषममा भवन्ति
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

106. ये चपि ते चरितसारमिदं गणेश !
भक्त्या पठन्ति शतकं हि नरोत्तमास्तु ।
तेभ्य: प्रयच्छ विमलां धियमात्मतुष्टिं
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

107. यच्चापशब्दितमिहास्ति मदीय पद्ये–
ष्वत्यादराद्ग्रथितमेव न चापराधात् ।
अज्ञानतो रचितमित्यपि वा क्षमस्व
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

108. कायेन चाथ वचसा मनसेन्द्रियैर्वा
बुद्ध्यात्मना च सततं क्रियते मया यत ।
सर्वं हि तुभ्यमहमद्य समर्पयामि
विघ्नाधिराज ! विनमज्जनकल्पभूज ! ॥

श्रीमद्विठलदेवुनिवंशकलशाम्बुधिपूर्णशशाङ्कस्य भारद्वाजगोत्रतिलकस्य श्रीमद्वेङ्कटरायभट्टशर्मणः पौत्रेण, दैवज्ञशिखामणेः श्रीवीरास्वाम्यपरनामधेयस्य श्रीमद्वीरराघवशर्मणः षष्ठेन प्रियतनूजेन श्रीगौर्यम्बागर्भशुक्तिमुक्ताफलेन श्रीनिवासशतकादिशतकपञ्चकनिर्मितिसम्प्राप्तयशोविसरेण भगवत्कृपैकवर्मणा सुन्दरशर्मणा विरचतं षष्ठं विघ्नाधिराजशतकं सम्पूर्णम् ।

श्रीकृष्णार्पणमस्तु

विठलदेवुनि सुन्दरशर्मणा विरचितानीतरशतकानि

❋

1.	श्रीनिवासशतकम् (उत्तरप्रदेश संस्कृत अकाडमी संस्थया पुरस्कृतम्)	रू. 2-00
2.	देवीशतकम्	रू. 3-00
3.	वीराञ्जनेयशतकम्	रू. 3-00
4.	शम्भुशतकम्	रू. 4-00
5.	छायापतिशतकम्	रू. 6-00

प्राप्तिस्थानम्-

श्रीमती विठलदेवुनि नागरत्नम्मा

1-9-1112/G/3, दयानन्दनगरम्,

हैदराबाद्-500 044 (आन्ध्रप्रदेशः)